# Sindhukrita Surya Stuti

# સિન્ધુકૃતા સૂર્યસ્તુતિઃ

## Document Information

Text title : Sindhukrita Surya Stuti

File name : sUryastutiHsindhukRRitA.itx

Category : navagraha, gaNeshapurANa, stuti

Location : doc_z_misc_navagraha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 74 | 2.74 35-46||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# સિન્ધુકૃતા સૂર્યસ્તુતિઃ

નત્વા તત્પાદકમલં બદ્ધાઞ્જલિપુટોઽબ્રવીત્ ।
નમસ્તે દીનનાથાય નમસ્તે સર્વસાક્ષિણે ॥ ૩૫॥

નમસ્તે ત્રિદશેશાય બ્રહ્મવિષ્ણુશિવાત્મને ।
નમસ્તે વિશ્વવન્દ્યાય નમસ્તે વિશ્વહેતવે ॥ ૩૬॥

નમસ્તે વૃષ્ટિબીજાય સસ્યોત્પાદનહેતવે ।
પરબ્રહ્મસ્વરૂપાય સૃષ્ટિસ્થિત્યન્તહેતવે ॥ ૩૭॥

ગુણાતીતાય ગુરવે ગુણક્ષોભવિધાયિને ।
સર્વજ્ઞાય જ્ઞાનદાત્રે સર્વસ્ય પતયે નમઃ ॥ ૩૮॥

ધન્યં મે જન્મ દેવેશ ! વંશો મે જનકોઽપિ ચ ।
જનની ચ તપશ્ચાપિ યજ્જાતં તવ દર્શનમ્ ॥ ૩૯॥

વરદશ્ચેદ્ દિનેશ ત્વં દેહિ મે સર્વતોઽમૃતિમ્ ।
તવ પ્રસાદાત્ સઙ્ગ્રામે જયેયં સર્વદેવતાઃ ॥ ૪૦॥

વર્તમાનાદ્ દેવગણાન્ન મે મૃત્યુર્ભવેદિતિ ।
એવં તસ્ય વરાન્ શ્રુત્વા પરિતુષ્ટો વિભાવસુઃ ।
ઉવાચ નિજભક્તં તમનુષ્ઠાનકૃશં ભૃશમ્ ॥ ૪૧॥

સૂર્ય ઉવાચ ।
ન ભયં વિદ્યતે દેવયોનિભ્યો નૃભ્ય એવ ચ ।
ન તિર્યગ્ભ્યો ન નાગેભ્યો ન દિવા ન નિશિ ક્વચિત્ ॥ ૪૨॥

નોષઃકાલે ન સન્ધ્યાયાં મમ વાક્યાદ્ ભવિષ્યતિ ।
મરણં તે નૃપસુત ! ગૃહાણામૃતભાજનમ્ ॥ ૪૩॥

ઇદં યાવત્ કણ્ઠગતં તાવન્મૃત્યુર્ન તે ભવેત્ ।
નિષ્કાશયેદિદં યસ્તે તસ્માન્મૃત્યુર્ભવિષ્યતિ ॥ ૪૪॥

દેવો યોઽવતરેત્ કોઽપિ ધુન્વન્ કેશાગ્રતો દિવમ્ ।
યસ્યાઙ્ગુષ્ઠનખાગ્રે સ્યુર્બ્રહ્માણ્ડાનાં હિ કોટયઃ ॥ ૪૫॥

સ ત્વાં હનિષ્યતિ વિભુરન્યસ્માદભયં તવ ।
મદ્વરસ્ય પ્રસાદેન સર્વં તૃણમયં તવ ॥ ૪૬॥

ત્રૈલોક્યરાજ્યં તે દત્તં નાત્ર કાર્યા વિચારણા ।

ઇતિ સિન્ધુકૃતા સૂર્યસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૭૪ । ૨.૭૪ ૩૫-૪૬॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 74 . 2.74 35-46..

Proofread by Preeti Bhandare

*Sindhukrita Surya Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*